शत्र । सूर्य्यवंश्ये असमञ्जःपुत्रे दिलीपजनके राजभेदे तत्कथा रा०आ०४२अ०। अंशुमति पदार्थमात्रे त्रि० ।

**अंशुमती** स्त्री० अंशु सूक्ष्मं पत्रमस्याः अंशु+मतुप्+ङीप्। शालपर्ण्याम् (शालपान्) ।

**अंशुमत्फला** स्त्री० अंशुमानिव रक्तं फलं मोचकं यस्याः जातिवाचकत्वेऽपि फलान्ततया न ङीष् अजा० टाप्, अंशुमानिव समन्तात् प्रसृतं फलतीति फल-अच् वा । कदलीवृक्षे ।

**अंशुमालिन्** पु० अंशुभिर्मलते संबध्नाति मल-णिनि ३त०, अंशवः मालेव ततः अस्त्यर्थे इनि वा । सूर्य्ये, द्वादश संख्यायाञ्च । किरणादिजालवति त्रि० स्त्रियां ङीप् ।

**अंशुल** पु० अंशुं प्रभां बुद्धिप्रतिभां लाति ला-क । चाणक्ये मुनौ, मुनिमात्रे च । अंशुग्राहके त्रि० ।

**अंशुहस्त** पु० अंशुः किरणोहस्त इव जलाद्याकर्षणसाधनं यस्य । सूर्य्ये । "शरैरुस्रैरिवोदीच्यान् उद्धरिष्यन् रसानिवेति" रघौ सूर्य्यकिरणानां रसाकर्षकत्वस्य दृष्टान्तविधयोक्तत्वादस्य किरणस्य रसाकर्षकत्वाद्धस्तत्वम् । तस्य च सहस्रांशूनां रसाकर्षकत्वमग्रे सहस्रांशुशब्दे वक्ष्यते ।

**अंश्वादि** पु०। ब० । स्वरविशेषार्थं पाणिनिगणपाठोक्ते शब्दसमूहे, "प्रतेरंश्वादयस्तत्पुरुषे" (६,२,१९३ पा०) स च गणः अंशु जन, राजन्, उष्ट्र, खेटक, अजिर, आर्द्रा श्रवण, कृत्तिका अर्द्धपुर ।

**अंस** विभाजने अद०चु०उभ०अंसयति ते आंसिसत् त । आपुकि अंसापयतीत्येके । वि+विश्लेषकरणे प्रच्यावने च "व्यंसयामास तत् सैन्यमिति" भारतम् । अच् अंसः ।

**अंस** पुं अंस-कर्म्मभावादौ अच्। अंशशब्दार्थे, स्कन्धे च । "अंसनिषक्तबाहुः" "अंसारोपितचापेनेति" शान्तोऽपि स्कन्धे ।

**अंसत्र** न० अंसं स्कन्धं त्रायते त्रै-क। स्कन्धावरके कवचभेदे ।

**अंसकूट** पुंन० अंसः कूट इव दृढत्त्वात् । वृहत्स्कन्धे "राजन्योऽष्ट्रांसकूटक्रथनपटुरटद्घोरधारः कुठार इति प्रबोध०

**अंस(से)भार** पु० अंसे धृतः भारः शा० त० वा अलुक् । स्कन्धधृतभारे । [ठन् । स्कन्धभारहारके, स्त्रियां ङीष् ।

**अंस(से)भारिक** त्रि० अंस(से) भारेण हरति भस्त्रा०

**अंसल** त्रि० अंस+बलोपाधिके अस्त्यर्थे लच् । बलवति ।

**अंस्य** त्रि० अंसे भवः अंस+यत् । स्कन्धभवे, "ये अंस्या ये अङ्ग्याः सूचिका" इति वेदः । अंस-कर्म्मणि यत् । विभाज्ये त्रि० ।

**अंह** भासने अद० चु० उभ० । अंहयति ते आञ्जिहत् त ।

**अंहति** स्त्री० हन्ति दुरितमनया हन-अति, अंहादेशः । दाने।

**अंहस्** न० अमति गच्छति प्रायश्चित्तेन अम-असुन् हुक् च । पापे "मुञ्चन्त्वंहस" इति वेदः स्वधर्म्मत्यागे "लोभोऽनृतं चौर्य्यमनार्य्यमंहो ज्येष्ठा च माया कलहश्च दम्भः" इति भागवते कलिं प्रति परीक्षिद्वाक्यम् अंहः स्वधर्म्मत्यागः इति श्रीधरस्वामिरघुनन्दनादयः ।

**अंहिति** स्त्री० अहि-क्तिन् ग्रहादित्वात् इट् । दाने ।

**अंहु** त्रि० अहि-मृग० कु । पापकारिणि । "आ वोऽर्वाची सुमतिर्ववृत्यादंहोश्चिद्या" इति (य० ८, ७) "अंहोः" पापकारिणः हननशीलस्येति वेददीपः ।

**अंहुर** त्रि० अहि-मद्गुरादि० उरच् । गतियुक्ते "सप्त मर्य्यादाः कवयस्ततक्षुस्तासामेकामिदभ्यंहुरो गात्" इति वेदः ।

**अंह्रि** पु० अंहति गच्छत्यनेन अहि-वङ्क्र्यादि० क्रिन् । पादे वृक्षादीनां मूले, तेन अंह्रिपो वृक्षः । चतुःसंख्यायाञ्च ।

**अंह्रिप** पु० अंह्रिणा मूलेन पिबति सिक्ततोयम् पा-क । वृक्षमात्रे । [उपरिभागे च ।

**अंह्रिस्कन्ध** पु० अह्रेः स्कन्धइव । गुल्फेअङ्गुष्ठाङ्गुलिमध्यभागस्य

**अक** वक्रगतौ भ्वा० प० घटादि । अकति आकीत् । अकयति ।

**अक** न० न कम् सुखम् गुणवचनस्य नञ्योगे विरोध्यर्थाभिधायिता न० त० । दुःखे । नास्ति कं सुखं यस्मात् । पापे । नाकशब्दे अकं दुःखं पापं वा ।

**अकच** पु० अकाय दुःखाय चायते चाय-ड । केतुग्रहे तस्य चोदयेन लोकोपप्लवस्य शास्त्रप्रसिद्धिः केतुशब्दे विस्तरः ।"उपप्लवाय लोकानां धूमकेतुरिवोत्थित इति कुमा०। नास्ति कचोयस्य । केशशून्ये (टाकरोगयुक्त) त्रि० ।

**अकडम** न० अ,क,ड,म, इत्यादिक्रमेण चाद्यकोष्ठादौ वर्णसमुदायोऽस्त्यत्र अच् । ग्राहग्रगोपालमन्त्रस्य शुभाशुभविचारोपयोगिनि चक्रभेदे । तत्स्वरूपं यथा रुद्रयामले—"रेखाद्वयं पूर्व्वापरे मध्ये रेखाद्वयं लिखेत् । चतुष्कोणे चतूरेखाऽकडमं चक्रमण्डलम् । भ्रामयित्वा महावृत्तं निर्म्माय वर्णमालिखेत् । अकारादिक्षकारान्तान् क्लीवहीनान् लिखेत्ततः । एकैकक्रमतो लेख्यान्मेषादिकवृषान्तकान् । वामावर्त्तेन गणयेत् क्रमशो वीरवल्लभ ! । दक्षमार्गेण गणयेन्नामादिवर्णकादिकान् । मेषादितोहि नामान्तं क्रमशः मन्त्रपण्डितः । सिद्धसाध्यसुसिद्धारीन् पुनः सिद्धादिकान् पुनः । नवैकपञ्चमे सिद्धः साध्यः षड्दशयुग्मके। सुसिद्धस्त्रिमुनौ रुद्रे वेदाष्टद्वादशे रिपुः" इति । (क्लीववर्णाः ऋ ॠ ऌ ॡ वर्णाः)